ग्रन्थस्तेनारभ्यते सभ्यचेतःसन्तोषार्थं सूरिसर्वस्वनामा ।
सर्वार्थानां साधने साधकानां साक्षात्तन्मायां कल्पवृक्षानुकल्पः ॥६॥
क्वचित् स्ववाक्यैः क्वचिदार्षवाक्यैरिह क्वचित् पौरुषतन्त्रवाक्यैः ।
संगृह्यतेऽस्मिन् किल कर्मयोगः सन्तोषभाजस्त्विह सन्तु सन्तः ॥७॥

योगास्त्रयः समुदिता मुनिभिः पुराणैः
ज्ञानं क्रिया तदनु भक्तिरिति प्रसिद्धाः ।
तेषु क्रियैव सुगमा सुखसात्मभूत्या
ज्ञानं च भक्तिमुभयं जनयत्यसौ यत् ॥ ८ ॥

यत्कर्मणेत्यादि जगाद वाक्यं गीतासु साक्षाद्दशमे च कृष्णः ।
तमेतमित्यादिरिह श्रुतिश्च तदाह तस्मादुभयं प्रमाणम् ॥ ९ ॥

श्रीशारदातिलककान्तिकगौतमीय
श्रीपञ्चरात्रमुखतन्त्रमवेक्ष्य बुद्ध्या ।
सिद्धा हि सिद्धिमतुलां च यथापुरस्ते
तां कर्मयोगपदवीमविशङ्क्य वक्ष्ये ॥ १० ॥

कर्म स्मृतं चेन्द्रियवृत्तिसाध्यं सकारकं हेतुविशेषपूर्वम्
तत् षड्विधं सर्वपुराणसिद्धं ज्ञेयं क्रमात् श्रेष्ठतरं यथावत् ॥११॥

प्रतिषिद्धं तथा प्रायश्चित्तं नैमित्तिकं पुनः
काम्यं नित्यमुपास्यञ्च वरिष्ठं ह्युत्तरोत्तरम् ॥ १२ ॥

प्रतिषिद्धं तु नरकाद्यनिष्टफलसाधनं
सर्वेजनेन यत्कार्यं गोविप्रहननादिकम् ॥ १३ ॥

प्रायश्चित्तं कृते पापे यत् पापक्षयसाधनम् ।
चान्द्रायणप्राजापत्यकृच्छ्रत्रयादि व्रतं सताम् ॥ १४ ॥

येऽपि केचित् अविदेशं तथाऽन्यं
सेवन्त वा केचिदरं भजन्ते।
योगात् यदि वाञ्छितं चाप्नुवन्ति
सर्वोऽपि जगदीश माता हि नान्यः ॥ २५ ॥
तस्मादिदम् सोऽपि नो शेन पुरा।
नित्यं विश्वं तस्य तथ्यत्वतथ्यम्।
दृष्टं विश्वस्मिन्नदृष्टं किमस्ति।
व्यासादीनां वाक्यमेव प्रमाणम् ॥ २६ ॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ २७ ॥
धर्ममर्थं च कामं च मोक्षमभिच्छता सदा।
आराधनीयो भगवाननादिः पुरुषोत्तमः ॥ २८ ॥
यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः।
प्राणोपहाराच्च यथेन्द्रियाणि तथैव सर्वार्हणमच्युतेज्या ॥ २९ ॥
इत्यादि वाक्यं बहु वर्त्तते वै नोदाहृतं विस्तरशङ्कया मे।
तस्मान्मे संशयशल्यमेतद्वेदान्तवाक्यैरवतारणीयम् ॥ ३० ॥
फलमत उपपत्तेरित्यतः श्रीश एव
त्रिजगति फलदाता नेतरस्तादृशोऽस्ति।
श्रुतिरपि तदवोचद्यज्ञमीशाय जल्ला
स्वजनितफललब्ध्यै[1] कल्पयन्तेन देवाः ॥ ३१ ॥

[1] हस्तलिखितपुस्तके ... पुस्तकद्वये कृपलभ्यते। वस्तुतः 'स्वजनितफललब्ध्यै'
इत्येवं पाठ ... ... पाठो दृश्यते।

ग्रहानुत्तरे लोकपालान् पुरस्तात् पुराधीश्वरं दक्षिणे संयजेत।
समावाह्य पञ्चोपचारैर्यथावत् यजेताथवा पञ्च तानेककुम्भे ॥ ६ ॥
*संकल्प्य स्वस्तिवाच्य स्वयमृजुमथवाचार्यहस्तेन पूर्वं*
*ब्रह्माणं वस्त्रभूषादिभिरथ वरये वास्तुयागाय भूयः।*
आवाह्यौं भूर्भुवः स्वर्युतनिजनिजनाम्ना च हृन्ङेयुतेन
ब्रह्माद्यान् वास्तुदेवान् मलयजसुमनोधूपदीपैर्यजेत ॥ ७ ॥
पञ्चविंशतिपदे यजेद्विधिं साक्षताज्यचरुणाऽम्बमध्यतः।
दिक्षु तद्दशपदेषु पूर्वतः स्वार्घमाज्यसहितैः सुमोदकैः ॥ ८ ॥
दक्षिणे सशशिचन्दनैर्विवस्वन्तमामगुड़पिष्टकैः पुनः।
मित्रमस्तदिशि सद्गुड़ोदनैरुत्तरेऽम्बपिशितैर्महीधरम् ॥ ८ ॥
ईशानद्विपदद्वये गुड़युतैरापापवत्सौ क्रमा-
द्दर्भैः सदधिभिर्हुताशनदिशि क्षीरैः सिताज्यान्वितैः।
सावित्रं सवितारमेवमसुरेपीतोदनाज्योदनैः
शक्रं शक्रजयं च वायुदिशि सन्मांसान्नसाज्यामिषैः ॥ १० ॥
रुद्रं रुद्रजयं च तद्वहिरथो कोणत्रिकोष्ठोदितः *
काष्ठासु प्रति सप्तसप्तसु पदेष्वीशानकोणादनु।
ईशानप्रमुखान् सुरान् रदमितानुक्तैर्यजेद्वस्तुभि-
र्वाह्ये चाष्टसु पद्मसद्मसु विदार्य्यादींश्च शर्व्वादिकान् ॥ ११ ॥
ईशानं सघृताक्षतेन पयसा पर्जन्यमम्भोजिना-
पिष्टापीतपताकया ससितया देवं जयन्तं ततः।

---

* त्रिकोष्ठादितः इति पाठो (ग) पुस्तकेऽदृश्यते स चात्रयुक्त इव प्रतिभाति।
(११श श्लोके)

पञ्चैकत्राब्धिरूपावनिभुजशशियुग्युग्मभूयुग्मसंख्या-
युग्मैकद्वित्रिरूपत्रावनिशशिशशिद्वयोकपञ्चाग्निवेदाः।
अश्विन्यादिक्रमेणाचरमिह गदितं शेषभे विन्दुसर्गौ
जन्म नक्षत्रतो वा तदनवगमने नामतो वा गणेयम्॥ ३४॥

अथो जन्मसंपद्धरापत्क्षेमसंज्ञा-
स्ततः प्रत्यरिः साधको घातकश्च।
ततो मित्र मन्त्रेऽतिमित्रं च तत्र
त्रिरावृत्य मन्त्रावधि, स्वर्चकोष्ठात्॥ ३५॥

शशाङ्कद्विवेदर्त्तुनागांकसंस्थो
यदि स्यान्मनुः साधकः सिद्धिमेति।
त्रिवाणर्षि गस्थेत्रकिंचित् शुभं स्यात्-
विशेषादिमे नामतुल्यं फलन्ति॥ ३६॥

इदं मतं चेत् सकलागमानां प्रपञ्चसारस्य मते तथापि।
नक्षत्ररेखाक्रमवर्णसंख्या विलिख्यते तत्क्रतजातिमैत्री॥ ३७॥

पञ्चेन्दुत्रिचतुः शशीन्दुभुजसंख्यातान् रदान्तान् स्वरान्
कादीन् चक्रभुजद्विचक्रभुजयुक्पञ्चैकपञ्चानलान्।
चन्द्राग्नीन्दुशशीन्दुपञ्चधरणीपञ्चाग्निसंख्यान् क्रमा-
च्छान्तानन्त्यपदेऽथ पृथगि पुनस्तौ विन्दुसर्गौ लिखेत्॥ ३८॥

जानीत जन्मादिफलं पुरोवद्-
यथोदितं तैर्नवभि स्त्र भेदैः।
जात्यादिशुद्धिं गणये त्ततोऽसौ
जातिर्द्विधा सा गणयोनिभेदात्॥ ३९॥

रेखा: पञ्च सुरेन्द्रवारुणगता: कृत्वा वितस्त्यन्तरा:
शुक्ला: पञ्चकरायता: शशियमाशाग्रा स्तथैकादश ।
चत्वारिंशति * कोष्ठकेषु रचये द्वीथी र्बहि: पंक्तिभि-
र्मध्यद्वाष्टपदे द्विपंक्तिनि चतु:कोष्ठत्रयं शेषयेत् ॥ ४२ ॥
आग्नेयादिपदानि तत्र रजसा रक्तेन कृष्णेन वै
पीतेनाथ शितेन तत् क्रमथवा शुक्लादिना रञ्जयेत् ।
वीथी: श्यामरजोभिरेव निविड़ं संपूर्य्य तत्पूर्व्वत:
पद्मं वारुणकुम्भरोपणकृते चित्रं पुन: कल्पयेत् ॥ ४३ ॥
पुण्याहवाचन मथो वरुणार्चनं च
संकल्पपूर्व्वमवसाय विधिं विधिज्ञ: ।
जाते महोत्सवतया धुरि पञ्चघोषै †
पात्राणि तानि मलिलेन च शोधयित्वा ॥ ४४ ॥
आवेष्ट्य सूक्ष्मशिततन्तुभि रेक मेकं
मत्शालितण्डुलसुपूर्णपदेषु तेषु ।
गन्धप्रसूनकुशकूर्च्चसमास्तृतेषु
संस्थापये दुपरि पश्चिमत: क्रमेण ॥ ४५ ॥
ता: पालिका स्तदनु पञ्चमुखान् शरावान्
संस्पृश्य मूलमनुना क्रमत स्तदन्त: ।
मृद्वालुकोपलनिघृष्टकरीषचूर्णै:
संपूर्य्य कण्ठवलयान्त मथाम्बु सिञ्चेत् ॥ ४६ ॥

---

* चत्वारिंशत्संख्यकेषु । † ततंशुषिरमानद्धं घनमित्थंचतुर्विधं । स्त्रीण-मूलुलिका शब्द: पञ्चघोषोपदेरित: ।

गुरुस्तत् स्वप्नोत्थं शुभमशुभमादौ च गणयन्
शुभं चेत्स्यात्तस्मा अविकलमना द्रागुपदिशेत्।
अभद्रं चेत्तर्हिं स्वमनु मयुतं वा दशशतं
जपन् प्रायश्चित्तं विरचयतु तावत्तिलहुतैः (१) ॥ २० ॥

भद्राभद्रविवेकाय वच्ये स्वप्नफलान्यथ।
यान्युक्तान्यृषिभिः पूर्वं गौतमीयादिषु स्फुटम् ॥ २१ ॥

पानं रक्तसुराज्यगव्यपयसां शाल्यन्नदध्योदन-
श्वेतस्वादुफलाममांसहविषां स्थित्वासने चाशनम्।
प्रासादाद्रिवनस्पतीभहयनौगोपुङ्गवारोहणं
शुक्लस्रग्वसनेन्दुशीतसुमनोमुक्तावलीधारणम् ॥ २२ ॥

विरामूत्रयन्न-हविषामुपलेपनं च
श्वेताहिदंशनिगडार्दनरोदनानि।
गुर्वग्निमित्रगणिकाद्विजराजवाजि-
गोहस्तिदैवतमहोत्सदर्शनं च ॥ २३ ॥

भूरत्नहेमरजतामलवस्त्रलाभो
दिव्याङ्गनालपनगोष्ठ्युपगूहनानि।
क्षेमङ्करो (२) शुककलस्वनसारिकादि-
सत्कूजितश्रवणमात्मनि कीटपातः (३) ॥ २४ ॥

---

(१) जपसंख्यं तिलहोमैः।

(२) मङ्गविल्लइतिख्यातः पक्षिविशेषः।

(३) स्वदेहे कृमिपातः।

वीणाधारणवादने प्रतरणं बाहुद्वयेनाम्भसा-
मित्यादीनि शुभानि मन्त्रिफलदान्युक्तानि पूर्वागमे ।
मिथ्या यद्यपि पूर्वसूरिभिरयं स्वप्नावलोको मतः
मन्त्रार्थिस्य च दैवसूचकतया सत्यो भवेत् कुत्रचित् ॥ २५ ॥

कृष्णारुणांशुकविलेपनमाल्यभूषा
याम्याननेन (१) महिषोष्ट्रखरेषु यानम् (२) ।
अभ्यङ्गलेपनदिगम्बरतातिपूति-
पङ्काङ्क गोमयमयोदधिमज्जनादि (३) ॥ २६ ॥

त्रिधा (४) महोत्पात महाहि मैथुन-
कृतान्तदूतोष्ट्रखरादिदर्शनम् ।
जुगुप्सितस्त्रीसहसङ्गभाषणं
स्वकर्णनासादिविकर्त्तनं तथा ॥ २७ ॥

द्विजगुरुनृपनिन्दा-भर्त्सनाद्यात्मनैव (५)
तुषभसितविलोठः पक्वमांसाशनं च ।
अशितभटनियुद्धं (६) प्रेतलोकाभिषङ्गः (७)
कथितमशुभमित्याद्यागमज्ञैः पुराणैः ॥ २८ ॥

---

(१) दक्षिणमुखेन ।
(२) प्रयाणं । (३) दुर्गन्धपंकाकीर्णे गोमयमये जलाधारे मज्जनमित्यर्थः ।
(४) भौमदिव्यान्तरीक्षभेदेन त्रिविधोमहोत्पातः ।
(५) आत्महत्या द्विजगुरुनृपनिन्दा ।
(६) लब्धवर्णभट्टैः सह बाहुयुद्धं ।
(७) मृतलोकसंगमः

यामे च प्रथमे फलत्यविकलं स्वप्न (१) स्समाभ्यन्तरे
मासैः षड्भिरथ त्रिभिश्च तदनु द्वाभ्यां द्वितीयादिषु ।
पश्चान्ते गरुडाग्रजोदयइतोऽन्यस्मिन् दशाहान्तरे
प्रायश्चित्तमिहाचरेद्गुरुरभिज्ञायैकवृद्ध्या (२) क्रमात् ॥ २८ ॥
प्रायश्चित्तं कर्त्तुमशक्तोऽयुतसंख्यं
गोविन्दाख्याकीर्त्तनमुच्चैर्विदधीत (३) ।
दुःस्वप्नानां दोषहरं यद्यदिहास्ति
स्तोत्रं मन्त्रं वर्म्म (४) च वा तत्तदधीत ॥ ३० ॥
अग्नित्रयं (५) त्रीणि च पुष्कराणि
रामत्रयं (६) त्रीणि पदानि विष्णोः ।
हरं त्रिनेत्रं त्रिपथां च गङ्गां
स्मरेच्च दुःस्वप्नविनाशनाय ॥ ३१ ॥
अथ प्रभातोचितकर्म्म कृत्वा गुरुः सदस्यानुमतेन तत्र ।
दुःस्वप्नदोषोपशमं विधाय शिष्यस्य दीक्षाविधिमारभेत ॥ ३२ ॥

(१) प्रथमयामिकः स्वप्नो वर्षाभ्यन्तरे द्वितीययामिकः षण्मासाभ्यन्तरे तृतीययामिक स्त्रिमासाभ्यन्तरे चतुर्थयामिकोमासद्वयाभ्यन्तरे तथारुणोदये पक्षाभ्यन्तरे तदुत्तरकालीनस्तुदशाहाभ्यन्तरे फलतीतिसम्बन्धः ।

(२) प्रथमयामेएकगुणं द्वितीयेद्विगुण मित्यादि क्रमेणेत्यर्थः ।

(३) गोविन्दनाम संकीर्त्तन मुच्चैः कर्त्तव्यं ।

(४) स्तोत्रं गजेन्द्रमोक्षणादि, मन्त्रं नामत्रयादि, कवचं नारसिंहादि ।

(५) आहवनीयादिवह्नित्रयं ।

(६) जामदग्न्यादिकं ।

स्नातं नवाम्बरविभूषणगन्धमाल्यैः
शिष्यं सुभूषितमतिप्रवणं प्रसन्नम् ।
पार्श्वे निवेश्य तदनेकमलप्रशान्त्यै (१)
स्वर्णं वितीर्य्य सतिलं विधिवद्विजेभ्यः ॥ ३३ ॥

गायत्रीमयुतमितां प्रजाप्य (२) विप्र-
द्वारेण द्विरदमुखं पुरोऽर्च्चयित्वा ।
स्वस्त्यन्तं द्विजवचसाऽवधार्य्य कुर्य्यात्
संकल्पं शिशुकुलगोत्रनामपूर्वम् ॥ ३४ ॥

वृद्धिश्राद्ध (३) समातृपूजनवसोर्द्धाराश्च (४) कृत्वा शिशो
रिष्टं दैवतमर्च्चयेच्च कलशे भक्त्या गुरुः पूर्ववत् ।
होमं कर्त्तुमथ स्वकुण्डकुहरे वह्निं स संपादयेद्
येन स्यात् सकलार्थदो हुतविधिर्म्मन्त्रः प्रसीदत्यपि ॥ ३५ ॥

अरणितरणिकान्ताग्नेयपाषाणजोऽग्नि-
र्विपुलविपिनसाग्निश्रोत्रियागारजो (५) वा ।
अभिमतफलसिद्ध्यै शस्यतेऽथोनिरग्नि-
द्विजसमखनृपाग्निः (६) किंचिदिष्टं विधत्ते ॥ ३६ ॥

विट्शूद्रगेहाच्च यदृच्छयाप्यलब्धो हुताशो न हुते प्रशस्तः ।
तस्मात् प्रयत्नेन विशुद्धमग्निं संपादयेत्तद्विधि रुच्यतेऽथ ॥ ३७ ॥

---

(१) आजन्मार्ज्जितपापक्षयार्थं । (२) जापयित्वा ; शिष्यमित्यन्वयः ।

(३) नान्दीमुख श्राद्धं । (४) मातृगणपूजासहितवसोर्धारास्च ।

(५) काष्ठद्वयजन्मा सूर्य्यकान्तमणिजोऽग्निकर्षपाषाणजोमहारण्यजन्मा-साग्निकश्रोत्रिय गृहागतो वा वह्निः प्रशस्तइत्याशयः ।

(६) निरग्निविप्रगृहानीतो दीक्षितनृपागारानीतो वा किंचिदिष्टफल-दायीत्यर्थः ।

वीक्षणप्रोक्षणे ताड़नाभ्युक्षणे दारणोद्धारणे पूरणास्फालने ।

सेचनं कुट्टनं मार्ज्जनं लेपनं तत्कलारूपसंचिन्तनं चार्च्चनम् ॥ ४३ ॥

अथ त्रिसूत्रीकरणं पवीकृति-

श्चतुष्पथास्त्रीकरणं (१) क्रमादमूः ।

प्रकीर्त्तिताः संस्कृतयोऽग्निवेश्मनां

सुधीभि रष्टादश यागकर्म्मसु ॥ ४४ ॥

न्यस्तमूलमनुना स्वचक्षुषा वीक्षणं भवति कुण्डवीक्षणात् ।

अस्त्रमन्त्रपरिकीर्णपाथसा प्रोक्षणं तदिव ताड़नं कुशैः ॥ ४५ ॥

अभ्युक्षणं वर्म्मनिरस्तनीरै रस्त्रेण किंचित् खननं त्वशन्या ।

तेनैव पांशूद्धरणं हृदा स्यात् प्रपूरणं शुद्धमृदा तदन्तः ॥ ४६ ॥

पुनः समानीकरणं कराग्रे-

णास्फालनादस्त्रमनुप्रजापैः ।

वर्म्माम्बुभिः (२) सेचनमप्यजापात्

स्थूलाणिना (३) कुट्टनमेव तेन ॥ ४७ ॥

स्यान्मार्ज्जनं तत्कवचोदकेन विलेपनं तेन हि गव्यतोयैः ।

मायाकलारूपविचिन्तनं स्यान्मूलेन तद्वन्मनुनार्च्चनं च ॥ ४८ ॥

तथा त्रिसूत्रीकरणं त्रिरेखीकर्त्तुं त्रिभिस्तत्कृतसूत्रपातैः ।

अस्त्रेण वज्रीकरणं विभाव्यं ज्वालातितापै र्न यथा स्फुटन्ति ॥ ४९ ॥

---

(१) चतुष्पथीकरणं चतुरस्त्रीकरणं चेत्यर्थः ।

(२) कवचमन्त्रेण हूमित्यनेन मन्त्रितैर्जलैरित्यर्थः ।

(३) स्थूलकीलेन ।

चतुष्पथीकृत्य कुशैश्चतुर्भि-
रधोमुखैः कुण्डचतुर्द्दिगन्तः।
हृदा (१) युगास्रीकरणं (२) विदध्या-
द्वहिः परिस्तीर्य्य कुशैश्चतुर्भिः ॥ ५० ॥
कृत्वर्त्विग्भिः कुण्डसंस्कार मेभिः
किंवारम्भो वीक्षणाद्यैश्चतुर्भिः (३)।
भूयः कुर्य्यात् शोधनं शोषणं च
बीजाम्भोभिः (४) चालनं प्लावनं च ॥ ५१ ॥
आसाद्याग्रे होमयोग्यानि वस्तू-
न्येधः सर्पिस्तण्डुलान् स्रुक्स्रुवौ च।
दर्भान् पुष्पाण्यम्बुगन्धाक्षतादी-
न्यन्यान्यस्मिन् योग्यपात्राणि मन्त्री ॥ ५२ ॥
ततो वामभागे परिस्तीर्य्य दर्भान् पुलोमात्मजावल्लभाशागताग्रान्।
तदूर्द्ध्वे न्यसेद्द्वन्द्वरूपेण पात्राण्यथोऽधोगतास्यानि सर्वाणि धीमान् ॥५३
सौवर्णान्यपि राजतान्यपि तथा पात्राणि ताम्राणि वा
मृत्पात्राण्यपि·शांतिकादिषु परं शस्तानि कर्म्मस्विह।
सेन्द्राक्षद्रुमशिग्रुभुरुह (३) कृतान्येतानि विद्वेषणो-
च्चाटोन्मादनमारणादिषु भृशं लौहानि शैलानि च ॥ ५४ ॥

---

(१) हृदयमन्त्रेण। (२) चतुरस्रीकरणं।
(३) वीक्षणप्रोक्षणताड़नाभ्युक्षणैरित्यर्थः। (४) यं बीजादिजलैः।
(५) अर्ज्जुन विभीतक शिग्रुकाष्ठकृतानि।

अथोक्तेषु पात्रेषु तेष्वेव पात्रं जलैरेकमापूर्य्य तीर्थानि तत्र ।

सुसंचिन्त्य तैः प्रोक्षयेत् कूर्च्चदर्भैं र्हृदा पूर्व्वभागस्थितं द्रव्यजातम् ॥५५॥

तान्याच्छाद्य नवांशुकेन च ततः कुण्डोपरिष्टाल्लिखे-

द्रेखास्तिस्र उदक्शिखा हृदणुना दर्भेण वा बर्हिषा ।

तासु ब्रह्मयमोडुपानथ यजेत् कृत्वा पुनः प्राक्शिखा-

स्तिस्रस्तासु यजेन्मुकुन्दगिरिशस्वर्लोकनाथानपि ॥ ५६ ॥

संपूज्यैतान् केवलैर्गन्धपुष्पै

रङ्गानां यद्विस्तरे मुख्यपीड़ा (१) ।

एवं कृत्वा कण्ठदेशे कुशानां

द्वौ द्वौ न्यस्यन् कल्पयेदक्षपाटम् (२) ॥ ५७ ॥

कुण्डोदरे वह्निगृहञ्च वृत्तं षट्कोणमष्टच्छदपङ्कजं च ।

वृत्तं च भूवेश्म विलिख्य तत्र प्रविन्यसेदिष्टरमन्त्रमुक्ता ॥ ५८ ॥

सर्वाण्यभ्युक्षितानि प्रणवहृतजलैः स्तत्र तद्योगपीठं

सङ्कल्प्याधारशक्त्यादिक मुपरि गुरुः पीठपद्मान्त मर्च्चेत् ।

धर्म्मादीन् वह्निकोणादिषु च पुनरमूनञ्युतान् (३) दिक्षुमध्ये

बिम्बानि त्रीणि ताराक्षरयुतसकलान्यब्जपत्रेषु शक्तीः ॥ ५९ ॥

पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ।

रुचिरा ज्वालिनी प्रोक्ताः कृशानोर्नव शक्तयः ॥ ६० ॥

---

(१) यतः अङ्गदेवतानां विस्तरतोऽर्च्चने मुख्यदेवतायाः पूजनव्याघातः स्यात्तस्मात्तान् अङ्गदेवानविस्तरेण पूजयेदित्याशयः ।

(२) कपाटानां रक्षसामभावो दूरीकरणं वा अक्षाणां पाटः उत्पाटनं का अक्षपाटमित्यक्षार्थोबोध्यः ।

(३) धर्म्मादीन् नञ्युतानधर्म्मादीन् चतुर इत्यर्थः ।

एता नामानुरूपोज्ज्वलतरवपुषो भावयित्वाऽत्र पीठे
संविष्टां तां सकामां युवतिमृतुमतीं वैष्णवो विष्णुपत्नीम् ।
सुस्नातां काञ्चनाभां विविधमणिलसद्भूषणां भर्त्तृरक्तां
ध्यायेदन्यस्तु देवीं नवघनरुचिरा मार्त्तवाकल्पशोभाम् ॥ ६१ ॥
स्वं भर्त्तारं कामुकं तत्र तस्या मासक्तान्तर्वृत्तकं चिन्तयित्वा ।
अभ्यर्च्चैत्तौ शक्तिबीजभ्रुवाभ्यां सम्यक्पात्रेणानयेत् साधिताग्निम् ॥६२
भृगुशापवशात् स सर्वभुक्
समभूत्क्रव्यवहो यतः पुरा ।
विधिवाक्यवशात् (१) पुनः शुचे-
र्वपुषः क्रव्यभुगेकभाग (२) आसीत् ॥ ६३ ॥
तस्मात्वेष्टः स्वेष्टहोमक्रियासु क्रव्यादांश स्तस्य यत्पायुदेशः ।
दूरे त्त्विप्ता तस्य तस्मात्तदंशं (३) शुद्धांशेन प्रारभेतात्मकर्म्म ॥ ६४ ॥
रंबीजोक्त्या नैऋते क्षेपदृष्टः क्षेपं कृत्वा क्षालयेद् हस्त मद्भिः (४) ।
एवं सर्व्वत्रापि रक्षःप्रयुक्तस्तोयस्पर्शः कर्म्मकाले विधेयः ॥ ६५ ॥
संस्कृत्य वह्निं खलु वीक्षणाद्यै
रौदर्य्यभौमानलवैद्युतानां ।
ऐक्यं स्मरन् पूर्व्वतया तदग्ने
र्बीजेन चैतन्यमपि प्रयुञ्ज्यात् (५) ॥ ६६ ॥

---

(१) ब्रह्मवाक्यवशात् ।

(२) क्रव्यादाख्यएकभागोऽपानदेशीयः ।

(३) क्रव्यादांशं क्रव्यादायनम इतिदूरे क्षिपेदित्यर्थः ।

(४) रमित्युच्चार्य्य नैऋतेतद्भागं क्षिप्त्वाहस्तं जलेन प्रक्षालयेदित्यर्थः ।

(५) रंबीजेनस्वहृद्गतं चैतन्यं वह्नौ योजयेदित्यर्थः ।

तां तारैरभिमन्त्र्य धेनुनिभया सौधीकृतं मुद्रया
स्वास्त्रेणाप्यभिरक्षितं च कवचेनैवाभितो गुण्ठितम् ।
गन्धाद्यैः परिपूजितं स्वमनुना संभ्राम्य कुण्डोपरि
प्रादक्षिण्यतया त्रिशः सचषकं वह्निं कराभ्यां दधत् ॥ ६७ ॥
निपात्य जानुद्वय मग्रभूमौ मन्त्रं सतारं प्लुत मभ्युदीर्य्य ।
नीत्वाऽनलं स्वाभिमुखं विभाव्य वीर्य्यं सुरेशस्य धियेतिमन्त्री ॥ ६८ ॥
कुण्डं देव्यागर्भमेवं विभाव्य योनिं तस्या योनिमित्येव तत्र ।
योनौ नीत्वा गर्भनाड्यां क्षिपेत्तं देव्याः किंचिन्मीलिताक्षः स्मरेण ॥६९॥
ध्यात्वा गर्भाधानमेवं कृशानोर्द्दैव्यै देवायाचमं चार्च्चयित्वा ।
दक्षे पाणौ कङ्कणं दर्भक्लृप्तं बद्धा देव्या गर्भरक्षार्थमस्त्रैः ॥ ७० ॥
संपूज्य कश्चन समित्कवलं विदध्या-
दाच्छादयेदनु सदिन्धनसंप्रयोगैः ।
प्रज्वालयेद्व्यजनधीरसमीरणेन
ज्वालामनुं च समुदीर्य्य यथास्वरूपम् ॥ ७१ ॥
चित्पिङ्गलान्तेहनयुग्ममुक्त्वादहद्वयं चाथ पचद्वयं च ।
सर्वज्ञचाज्ञापय वह्निजाया ज्वालामनुस्तत्वलिपिर्म्मतोऽयं ॥ ७२ ॥
उत्तिष्ठान्ते पुरुषहरितौ पिङ्गलं लोहिताक्षं
प्रागुक्त्वा साधय पदयुतं सर्वकर्म्माणि मेऽन्तं ।
भूयो देहीत्यथ च निगदेद्दापयाग्निप्रियान्तं
मन्त्रेणोत्थापयतु दहनं मान्त्रिकोऽनेन तत्र ॥ ७३ ॥
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनं ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखं ॥ ७४ ॥

अमुना मनुना प्रणम्य धीमानुपतिष्ठेत हुताशनं प्रदीप्तम् ।
रसना अपि सप्तदिक्षु मध्ये प्रसरन्तीरनुचिन्तयेदमुष्य ॥ ७५ ॥

कुण्डस्यैशान्यसंस्था शुचिकनकनिभा कर्षणादौ हिरण्या
पूर्वस्यां स्तम्भनादौ प्रभवति गगना-स्निग्धवैदूर्य्यवर्णा ।
आग्नेये चाथ रक्ता शिशुतरणिनिभा वैरिविद्वेषणादौ
नैर्ऋत्यामेव कृष्णा नवजलदनिभा मारणादौ विशेषात् ॥ ७६ ॥

वारुण्यां पद्मरागच्छवि रतिरुचिरा सुप्रभा शान्तिकृत्ये
वायव्ये चातिरक्ता करककुसुमभा विद्विड़ुच्चाटनादौ ।
सौम्ये याम्ये च मध्ये विलसति बहुरूपाभिधाऽनेकवर्णा
सौम्ये सिद्धिं विधत्ते यमदिशि धनगोवृद्धिमन्त्यः शुभानि ॥ ७७ ॥

अन्येत्वागमपारगाऽमलधियः प्राहुर्बुधाः सुप्रभां
वृत्रारेः ककुभिस्थितां पितृपतेः कृष्णां हिरण्यां पुनः ।
वारुण्यां बहुरूपिकां पुरभिदोरक्ता सुदीच्यांस्थिता
माग्नेय्यामतिरक्तिकां च कनकां कुण्डस्य मध्येस्थिताम् ॥ ७८ ॥

आसां हिरण्या गगना च रक्ता कृष्णा च याम्याननगा रसज्ञाः ।
यासु प्रभाख्या रसनातिरक्ता वामाननस्था बहुरूपिका च ॥ ७९ ॥

केचित् प्राहुस्त्रिधा स्ता हुतवहरसनास्तत्र सात्त्विक्य एताः
शस्ता यागादिकृत्ये तदनु निगदिताः पद्मरागा सुवर्णा ।
श्वेता धूम्रा कराला कृतगुणलुहिता (१) लोहिता भद्रपूर्वा
प्रोक्ता राजस्य एताः सकल जनमनोऽन्याय्यकाम्य·क्रियासु ॥ ८० ॥

---

(१) कृतः गुणोयस्यलुहितइत्यस्य तेन लुकारस्योकारगुणेकृते लोहिता इत्यायाति ।

तामस्यो विश्वमूर्त्ति स्तदनु किल मनोयुग्जवाधूम्रवर्णा
कालीचाथ स्फुलिङ्गिन्यथ तदनुबता लोहिताग्या कराला।
एता: क्रूरेषु कर्म्मस्वथ गुणसदृशं वर्ण मेता वहन्ति
ह्यासां समाधिदेवा: सुरपितृसुगयचाहिरक्ष:पिशाचा: ॥ ८१ ॥

इति श्रीगोविन्दकविभूषणसामन्तरायविरचिते सूरिसर्वस्वे वह्निजननविधिर्नाम नवम: संग्रह: ॥ * ॥

दशम: संग्रह:।

सत्य-षष्ठ-स्वरै: सादि यान्ताक्षरै:
सप्तभि: संयुता: सप्तजिह्वा: शुचे:।
विन्यसेत् स्वस्य पायौ शिवे नाभिहृत्-
कण्ठकूपे भ्रुवोरन्तरेऽथ क्रमात् ॥ १ ॥
वह्निमभ्यर्चितं तन्मनो विन्यसेदङ्ग-मुन्यादि-विन्याससमूर्त्तीरपि।
तत्र मन्त्राक्षरोद्धारपद्यं ब्रुवे येन सोऽभ्यर्चितस्तुष्टिमेति क्षणात् ॥ २ ॥
सबीजवैश्वानर-जातवेद इहावहान्तेखलु लोहिताक्ष।
ससर्वकर्म्माणिच साधयेति द्विठावधिर्वह्निमनुर्भवर्ण: (१) ॥ ३ ॥
भृगुरस्य मुनि: समीरित स्त्रिपदाछन्द उषर्बुधोऽधिदेव:।
रुधिरं (२) च शिरश्चबीज-शक्ती हुतकृत्ये तदुपस्थितौ नियोग: ॥ ४ ॥
सहस्रर्चिषे हृद्यथ स्वस्तिपूर्णाय शीर्षे तथोत्तिष्ठ (३) पुंसे शिखायां।
तनोधूमयुग्व्यापिने सप्तजिह्वाय नेत्रेष्वथास्त्रे धनुर्युग्धराय ॥ ५ ॥

(१) भवर्ण: सप्तर्विंशाक्षर। (२) रंबीजं स्वाहाशक्ति:।
(३) उत्तिष्ठपुरुषाय।

न्यस्त्वाङ्गमन्त्रानिति जातियुक्तान् पुनर्न्यसेद्व्यभुजोऽष्टमूर्त्तिं।
ताराग्नयेशब्दयुतानमोन्ताः स्थानेषु मूर्द्धादिषु ता यथोक्तं॥ ६॥
न्यस्योनिजेमूर्द्धनिजातवेदाः खदक्षिणेऽंसे खलु सप्तजिह्वः।
पार्श्वे च तस्मिन्नपि हव्यवाहस्तस्यामथाश्वोदरजश्च कव्यां॥ ७॥
वैश्वानरश्चापि ततः स्वलिङ्गे
कौमारतेजा अथ वामकव्यां।
पार्श्वे पुनर्विश्वमुखश्च वामे
वामेऽंसके देवमुखः क्रमोऽयं॥ ८॥
एवं न्यस्ततनुःस्मरेद्धुतवहं प्रांशुं प्रचण्डप्रभं
विद्युत्पिङ्गसटं हिशीर्षं मकुणं पिङ्गोग्रचण्लोचनं।
नासाभ्यां भृतहव्यकव्य (१) मकुणैः शृङ्गैश्चतुर्भिर्युतं
श्रोतैश्चापि चतुर्भिरुग्रदशनज्योतिर्विलीढाधरं॥ ९॥
माणिक्योज्ज्वलचण्डतुण्डविलयोर्जिह्वा दधानं पुन-
र्वामे दक्षिणतोऽप्युपर्युपरिगास्तिस्रश्चतस्रः क्रमात्।
पिङ्गश्मश्रुलसत्कपोलचिबुकं वक्षःस्थलप्रोल्लस-
न्मन्दारस्रजमंसदेशविलसत्स्वर्णोपवीतोत्तमं॥ १०॥
दोर्भिर्दक्षिणगैश्चतुर्भिरमलां शक्तिं स्रुवं च स्रुचं
वज्रं चाप्य परैस्त्रिभिश्च दधतं सत्तालवृन्तं महत्।
सर्पिःपूर्णसुवर्णभाजनमयस्तोत्तानानं तोमरं
मध्यभ्राजदतीव शुक्लवसनं काञ्चीकलापोज्ज्वलं॥ ११॥

---

(१) दक्षिण नासायं। हव्यं देवभोज्यं वामनासायां कव्यं पितृभोज्यं च दधतं इत्यर्थं।

आसीनं त्वरुणाम्बुजोपरिपदद्दन्द्वेन च स्वस्तिका-
कारेणाथ तृतीय पादकमलं स्वाग्रे प्रसार्य्य स्थितं।
पृष्ठस्थेन वृषेण चात्तजनुषा स्कन्देन चोपासितं
नानाकल्पमनोहरं स्वमभितः स्वाहास्वधालङ्कृतं॥ १२॥
एवं ध्यायेत् शान्तिकर्म्मादिकृत्ये
क्रुद्धंध्यायेन्मारणे कृष्णवर्णं।
तत्राशक्तौ गोतमीयादिषूक्तं
रूपं ध्यायेत् शान्तमन्तः (१) कृशानोः॥ १३॥
त्रिनयन मरुणाभं बद्धमौलिं सुशुक्लां
शुकमरुण मनेकाकल्पमम्भोजसंस्थं।
अभिमतवरशक्तिस्वस्तिकाभीतिमुच्चै
र्दधतममलमालालङ्कृताङ्गं कृशानुं॥ १४॥
उपासनायामिति चिन्तनीय मित्येव मार्गं सुधियो वदन्ति।
यतस्त्रिनेत्रादिविचिन्तनेन वामेक्षणादौ विहितोऽस्तिहोमः॥१५॥
सर्व्वालङ्कारान्वितं सर्व्वकर्म्मस्वेवंरूपं साधकश्चित्रभानुं।
सम्यग्ध्यायेत् सप्तजिह्वाभिराभियुक्तं ज्ञात्वा व्याहृतोत्तानवक्त्रं॥ १६॥
शान्तिकामविषये विभावसो र्वासवेशहरितो मुखं मतं।
कर्षणे पवनपाशिनोर्दिशो र्म्मारणे शमन-रक्षसोः पुनः॥ १७॥
स्तम्भने निजदिगाननं स्मरेन्मोहने धनददिग्गताननं।
अन्यकर्म्मसु च मध्यतो मुखं वश्यकामाविषयेऽथ सर्व्वतः॥ १८॥

---

(१) अन्तःकरणेध्यायेत्।

उत्तिष्ठन्तं भावयेदिध्महोमे सर्पिर्होमे हव्यवाहं शयानं ।
अन्यद्व्यास्वाहुतौ सन्निषन्न मित्थं प्राहुः केचिदाचारविज्ञाः ॥१९॥
ध्यातं वह्निं गन्धपुष्पाक्षताद्यै र्धूपैर्दीपैः शुद्धनैवेद्यजातैः ।
सन्तोष्यामुं यन्त्रमध्ये समिद्धं सत्कुर्य्यात्तद्देवतास्वावृतिस्थाः ॥ २० ॥
मध्ये तस्मिन् कोण-षट्के च विद्वान्
जिह्वाज्वालारोचिषः साधिदेवाः ।
बाह्येऽङ्गानां देवताः केशरेषु
मूर्त्तीः शक्ति-स्वस्तिकाढ़्यादलेषु ॥ २१ ॥
पत्राग्रेषूर्द्ध्वाध आशाधिनाथान् संपूज्यामुं गर्भगं रक्तर्तेति ।
उच्चैरुक्त्वा श्रावयेद्देवतास्ताः पर्य्युक्ष्याज्ञि वह्निं मभ्युक्षयेच्च ॥ २२ ॥
उदग्रैः प्रागग्रैरभित उदराग्रै रथ कुशै
रदर्भैः प्राग्वर्ज्जं दिशि दिशि परिस्तीर्य्य विधिवत् ।
तथा प्राचीवर्ज्जं तदनु परिधीन् यज्ञतरुजा-
नृजूंस्तान् संस्तीर्य्य द्रुहिणमुखदेवानिह यजेत् ॥ २३ ॥
केचिदाहु रपरे चतुर स्तान् बाहुमात्रसरलान् परिधींस्तु ।
अर्च्चयेत्तदुपरि द्रुहिणेशौ प्राग्दिगादिषु च विष्णु मनन्तं ॥ २४ ॥
कुण्डस्य यावत् परिमाण माहु स्तावत् प्रमाणान् परिधीन् करोतु ।
केचिद्बुधा हस्तमितं वदन्ति साधारणं यत्करमात्र कुण्डं ॥ २५ ॥
स्वकुण्ड एकमेखलेऽस्यमेखलाध आस्तरेत् ।
द्विमेखले परिस्तरेद्द्वितीयमेखलोपरि ॥ २६ ॥
कुण्डएव रचिते त्रिमेखले पञ्चसप्तमितमेखलेऽथवा ।
तत्रमध्यगतमेखलोपरि प्रज्ञया परिमृशन् परिस्तरेत् ॥ २७ ॥

दीप्तेन दर्भद्वितयेन सर्पिर्नीराज्य नोज्य तदग्निमध्ये।
विसर्ज्जयेत् तत्त्रवचाणुनेव धीरैरभिद्योतन मेतदुक्तं ॥ ३६ ॥
घृतात् कदर्भान् ज्वलितान् विधाय घृतोपरिष्ठात् परितः प्रदर्श्य।
वह्नौ क्षिपेद् दस्त्रमनुं जपं स्यात् सुधीभि रुद्योतन मेतदुक्तं ॥ ३७॥
अनामिकाङ्गुष्ठयुगेन कृत्वा प्रादेशमात्राच्चतदर्भयुग्मं।
छेत्योत्पुनीयादघृत (१) माशुवीज्य विनिक्षिपेदुत्पवनं मतं तत् ॥३८॥
स्वसंमुखं हृन्मनुना घृतं तत् संप्लावयेद्दर्भयुगेन भूयः।
इदं मतं संप्लवनं मनुज्ञैः संस्कारषट्कं हविषि प्रयुञ्ज्यात् ॥ ३९ ॥
इत्थं विशुद्धं घृतपात्र मग्नेरुत्तोल्य सौम्यां दिशि पश्चिमायां।
संस्थाप्य चाङ्गारकुलं स्वकुण्डे निक्षिप्य भूयः सलिलं स्पृशेच्च ॥ ४० ॥
प्रादेशमात्रघृतदर्भयुगस्य मध्ये
ग्रन्थिं विधाय निदधीत तदाज्यमध्ये।
तद्वामभाग मिड़या सह कृष्णपक्षं
ध्यायेदसव्य मथ पिङ्गलयाऽच्छपक्षं ॥ ४१ ॥
मध्यं सुषुम्णावदनं विभाव्य षडङ्गुलं तत्स्रुवमूलभागं।
त्यक्त्वा दधीतापरभाग मस्य दक्षेण दोष्णा दर-मुद्रयैव (२) ॥ ४२ ॥
आदायस्रुवविवरेण दक्षभागा-
त्तत्राज्यं सपदि हृदाक्षिपेद्दक्षिणेऽग्नेः।
स्वाहान्तप्रणवयुताग्नये निगद्य
ज्वालाया मथ जुहुयात् ससंस्रवान्तं ॥ ४३ ॥

---

(१) अस्त्रमन्त्रेण। (२) दृगङ्गुष्ठया।

आधानेऽथ नमोऽथ पुंसवनतः स्वाहाथ वर्म्मस्मृतं
सीमन्तोन्नयनेऽथ जन्मनि च यन्नाम क्रियायांनतिः।
वौषण्निष्क्रमणे स्वधान्नभजने चौले वषड्द्वयं
श्रौषड्वा मत मेतदौपनयने हुं स्यान्महानाम्नके ॥ ५३ ॥
स्वाहाचापि महाव्रतोपनिषदे शेखं समावर्त्तने
गोदाने नयनं नमः परिणयेत् हुँ फ स्मः स्यान्मृतौ।
मन्त्रान्ते विनियोज्य कर्म्म कलये देवं क्रमाद्देशिको
हिंस्रे कर्म्मणि षोड़श स्युरितरत्राग्ने र्विवाहान्तकाः ॥ ५४ ॥
केचिन्नैतज्जातकर्म्मान्तमाहुः केचिन्मौञ्जीवन्धनान्तं क्रमेण।
गोदानान्तं केचिदार्य्याश्चरन्ति श्रेयःक्लृप्त्यै केऽपि वैवाहिकान्तम् ॥५५॥
तत श्च पितरौ शुचेः समभिपूज्य गन्धादिभि-
र्नियोज्य निजतेजसि स्वहृदयस्थप्रत्यक्चिति।
समूलशिखरप्लुतं शृतघृतैः समित् पञ्चकं
हुताशमनुना हुनेदथ घृताहुतो स्रावतीः ॥ ५६ ॥
गुरुं हृदयमन्त्रतो दश हुने द्विना स्वाहया
महागणपतिं पुनः स्वमनुना दशैकाहुतीः।
तदङ्गरसनाभिमान्यमर-मूर्त्ति-मन्त्रैः क्रमा-
ज्जुहोतु पृथगेकशो मतमिदं हि वह्नेर्म्मुखम् ॥ ५७ ॥
बहुरूपाया मथ रसनायां साङ्गं सावृतिदैवतपीठम्।
ध्यात्वावाह्यार्घ्यादि-समेतं तस्मिन्नर्चेद्दैवतमिष्टम् ॥ ५८ ॥
ध्यायन्निष्टां देवतामग्निरूपा मास्ये तस्याज्ज्वालजिह्वान्तराले।
आज्यैर्हुत्वा पञ्चविंशत्युपेता.मूलेनास्या आहुतीः शुद्धबुद्धिः ॥ ५९ ॥

कर्पूरकुङ्कुमपटीरकुरङ्गनाभाऽ
गुर्वादिकानि चणकप्रमितानि कृत्वा ।
उर्वारुकादिक (१) कपित्थफलं द्विधा च
बैल्वं फलं तदनु कर्कटिका (२) त्रिधैव ॥ ६६ ॥
गोधूमरक्तकलमाणु सराजमाष-
नीवारकोद्रव सवैणवकङ्गुमाषान् ।
श्यामाकमुद्गचणकादिकलाजसक्थु-
पिन्याकचूर्णपृथुकानपि मुष्टिमात्रान् ॥ ६७ ॥
नारिकेलफल मष्टधाकृतं पानशं च दशधा महद्यदि ।
मातुलङ्गफल मेव तच्चतुर्धा विभज्य विधिनैव होमयेत् ॥ ६८ ॥
फलानि चान्यान्यखिलानि रम्भाजम्भाम्रमुख्यानि दलानि दर्भान् ।
अपूप पुष्पाणि न खण्डितानि हुनेत्तथैकैक मुषर्बुधास्ये ॥ ६९ ॥
कवलार्द्धमितं च चरुं कृशांशं चलुकप्रमितां स्तिल सर्षपकान् ।
अपरं यदिहास्ति मयानुदितं तदवेत्य गुरोर्ज्जनतो (३) जुहुयात् ॥७०॥
हिरण्यायामेधः क्षिपतु गगनायामथ चरुं
यवाद्यं रक्तायां सतिल मतिरक्तार्च्चिषि हविः ।
सलाजान् कृष्णायां कुशकुसुम सक्थूं स्तदनुसु-
प्रभायां सिद्धार्था नथ च बहुरूपार्च्चिषि परं ॥ ७१ ॥

(१) कुष्माण्डादिकं ।
(२) जम्बा जम्बीर जम्बालाः ।
(३) गुरुमुखाल्लोकमुखाच्च ज्ञात्वा ।

मुखान्मन्जिह्वायां हविरिह हुतं चेष्टितकरं
न चान्यत्र क्वापि श्रवण-नयनाद्या ववयवे ।
अतस्तज्ज्ञानीया दवयव-विधानं हुतभुजः
फलं वा दोषं वा तदुपहितहोमस्य विधिवत् ॥ ७२ ॥

काष्ठं यतस्तत्र वदन्ति कर्णं नासां च धूमं भसितं शिरोऽस्य ।
नेत्रं तथाल्पज्वलनं कृशानो र्ज्वालाजटालां कलयन्ति जिह्वाम् ॥७३॥

वह्नेः कर्णे होमतो व्याधिबाधा नेत्रेऽन्धत्वं नासिकाया मथाधिः ।
द्रव्यच्छेदो मस्तके स्यादथास्ये होमं कुर्य्यात्तेन मन्त्री विचिन्त्य ॥७४॥

तत स्ते होतारो विहितनियमाः प्रागभिहिता
यथावत् संस्कुर्य्यु र्विहित-निज-कुण्डान्यथ पृथक् ।
हुताशं त्वाचार्य्यः सुरपतिदिगादिष्वभि-हरेत्
क्रमात्तेषूद्दीप्ते हुतभुजि ततस्ते च जुहुयुः ॥ ७५ ॥

कृत्वेन्द्रियोद्घाटनमादितोऽग्नेः पूर्वोक्तमार्गेण चरुं प्रसाध्य ।
आच्छाद्य पात्रेण निधाय पार्श्वे कृत्वा विधानेन शरीरशुद्धिं ॥ ७६ ॥

गन्धाक्षतादि कुसुमैर्निज देवतां ता
मङ्गास्त्र-पार्षदनिजावृतिदेवताभिः ।
अभ्यर्च्य मूलमनुना चरुणा घृतेन
प्रत्येकतो जुहुयु राहुति-पञ्चविंशान् ॥ ७७ ॥

होमं कृत्वा तुष्टये हव्यवाह स्तिस्रो मुद्रा दर्शये द्धौतहस्तः ।
मार्गी हंसी शूकरी चेति तासां वक्ष्ये साक्षाल्लक्षितं लक्षणानि ॥७८॥

एकीकृत्यानामिकाङ्गुष्ठमध्याग्राणि क्षिप्रा तिर्य्यगन्याङ्गुली द्वे ।
दीप्ता वह्नेः संमुखं दक्षिणेन धीरै र्मुद्रा दर्शनीया मृगीयम् ॥ ७९ ॥

सर्वाङ्गुलीनामपि दक्षपाणे रधोमुखीकृत्य शिरांसि मध्ये।
समुन्नकीकृत्य निरस्य मध्या मूर्द्धं नताग्रां विदधीत हंसीं ॥ ८० ॥
दक्षहस्ताङ्गुलीः सर्वाः कृत्वाधःशिखराः समम्।
दर्शयेत् कोलमुखवन्मुद्रेयं शूकरी मता ॥ ८१ ॥

इति श्रीगोविन्दकविभूषणसामन्तरायविरचिते सूरिसर्वस्वे होमविधिर्नाम दशमः संग्रहः ॥ १० ॥ * *

## एकादशः संग्रहः ।

यदि पूर्वदिने विधिरेष बुधैः क्रियते पुनरेव परेद्युरपि।
अखिलं तु समाप्य च पूर्णतमा हविषाहुति रव तथा क्रियतां ॥ १ ॥
विप्राशीर्भि र्मङ्गलैः शङ्ख-घोषै र्ध्यात्वा मन्त्री देवता मिष्टरूपां।
मूलं मन्त्रं वौषडन्तं प्रयत्ना दुच्चार्य्याऽन्ते सर्पिषैवं जुहोतु ॥ २ ॥
ओं भूरुक्तां वह्नयेऽन्ते पृथिव्यै भूयोङेन्तं ठद्वयान्तं महान्तं।
हुत्वानेनाद्याहुतिं हव्यवाहे तद्वद्द्यादोँ भुवोऽन्ते द्वितीयां ॥ ३ ॥
ङेऽन्तं (१) वायुंचान्तरीक्षं महान्तं
स्वाहेत्युक्ताऽथो तृतीयां जुहोतु।
ओँ (२) स्वश्चान्ते भास्वतेऽन्ते दिवे च
प्रोक्ता स्वाहा प्राक् स तुर्य्यं महान्तं ॥ ४ ॥

---

(१) ओं भुवोवायवेचान्तरीक्षाय महते स्वाहा।

(२) ओं स्वर्भास्वतेदिवेमहते स्वाहा।

ओँ (१) भूर्भुवःस्वरिति चन्द्रमसे च नक्ष-
त्रेभ्योऽथ दिग्भ्य इति तन्महते द्विठान्तं ।
उक्त्वा हुने हुतवहे विधिव त्तुरीयां
पूर्णाहुतिं वितनुयादथ कर्म्म-पूर्त्त्यै ॥ ५ ॥
स्रुवेणादायाग्रे घृतमथ चतुर्वार-विधया (२)
स्रुचा मन्त्री दूर्वाफल-कुसुमगन्धाक्षत-युजा ।
स्रुवं सर्पिः पूर्णं तदुपरि च नाभौ तदुभयं
निधायर्षिन्यासं न्यसतु निजपूर्णाहुति-मनोः ॥ ६ ॥
ऋषिर्ब्रह्मा छन्दो भवति जगती दैवतमुष-
र्बुधस्त्वाथ ब्रह्मार्पण मनुमुदीर्य्य स्रुच मपि ।
स्वदक्षश्रोत्रान्तं क्रमश उपनीयाथ वितरे-
ज्ज्वलज्ज्वालाजाले हुतभुजि शनैराहुति मिमाम् ॥ ७ ॥
ततोवर्णतो धूमतो गन्धतोऽग्नेः
शिखाकारतः शब्दतः सावधानः ।
शुभं वाऽशुभं देशिको वीक्ष्य दोषे
सति स्वाणुना होमयेत्तत्त्वसंख्यम् (३) ॥ ८ ॥
स्वर्णेन्द्रगोपमधुकुङ्कुमवालसूर्य्य-
सिन्दूरगुञ्जसदृशो दहनस्य वर्णः ।
गोभूधनात्मजसुखार्थसमृद्धिकृत्स्या-
देवं क्रमेण हुतकृद् यजमानयोश्च ॥ ९ ॥

---

(१) ओँ भूर्भुवः स्वः चन्द्रमसे नक्षत्रेभ्यो दिग्भ्योमहतेस्वाहा ।

(२) चतुर्वार ग्रहण प्रकारेण । (३) पञ्चविंशाहुतीः ।

अष्टोत्तरशतं सर्पिः सतिलं जुहुयाद्गुरुः ।
दोषेष्वेवंविधेष्वेवं जगुः केचित् पुराविदः ॥ १६ ॥
योजयेत्तदनुदेवतां धिया स्वाशयेऽथ (१) परिधीं श्च विष्टरान् ।
निक्षिपेद्दहनमध्यतस्ततो वह्निमेव सगणं विसर्जयेत् ॥ १७ ॥
नैमित्तिके तु परिधीन् सपरिस्तरांश्च
वह्नौ क्षिपेन्न च कदाचन नित्यहोमे ।
इत्थं हुतेष्ववसितेषु बलिं विदध्या-
त्तारादितो दिगधिपावधि मण्डलान्तः ॥ १८ ॥
नक्षत्रराशितदधीश्वरवारदेवा-
नुद्दिश्य गन्धसुमनोऽक्षतधूपदीपैः ।
दद्याद्बलिं चरुभि रम्बुपुरोऽवसाने
निक्षिप्य मण्डलपदेषु ततो ववाद्यान् ॥ १९ ॥
एता उक्ता देवता सूर्य्ययुक्ता (२) द्यन्ते (३) वान्ते चाथ नक्तंचरीभ्यः ।
सर्वेभ्योऽन्ते तत्रभूतेभ्य उक्ता बल्युत्सर्गे ह्येष मन्त्रोऽनुयोज्यः ॥ २० ॥
अश्विन्याद्युडुनाम सध्रुव मुदीर्य्यादौ मनुं योजये-
दन्तेऽप्येष बलिर्नमश्च विदधत्तारा यजेद्दोषिषु ।
मेषाद्याह्वयपूर्वकोडुयुगयुक्पादाधिकान्ते मनुं
युञ्जन् द्वादशराशिमण्डलपदेष्वेतान् द्विषट् पूजयेत् ॥ २१ ॥
मध्यत स्तदनु मीनमेषयोः संयजेच्च करणान् ववादिकान् ।
सप्तराश्यधिपतीन् ग्रहान् बहिः सप्त तज्जननयोनिदेवताः ॥ २२ ॥

---

(१) स्वहृदये । (२) चतुर्थीयुक्ता । (३) तदन्तेवा ।

सिंहराश्यधिपति र्दिवाकर श्चन्द्रमा भवति कर्कटाधिपः।
मेषवृश्चिकराश्योराधिपः कुजः कन्यकामिथुनयो र्बुधोऽधिपः॥ २३॥
मीनराशिधनुषो र्बृहस्पति र्भार्गवो वृषतुलाधिपो मतः।
कुम्भराशिमकराधिपः शनी राशिमण्डलबहि र्यजे द्दमून्॥ २४॥
सिंह-व्याघ्र-वराह-गर्द्दभगजा गोपुङ्गवः कुक्कुर
श्चेति स्यु र्ग्रहयोनय स्तत (४) इमाः पूज्या अमीषां पुरः।
शम्भुः शैलसुता गुहोऽथ मुरजि ल्लक्ष्मीः सरोजासनो
यत्तेशश्च ततो व ह्निर्निगदिता रव्यादि-वाराधिपाः॥ २५॥
वलिभिः परिपूज्य देवता विधिनैताः खलु नाममात्रतः।
अथ मण्डलदिक्ष्ववस्थितान् दिगधीशा ननुनाऽमुनार्च्चयेत्॥ २६॥
आद्याक्षरं वीजतया निगद्य दिक्पालनामाथ तुरीययुक्तं।
श्रीविष्णुशब्दान्वितपार्षदाय दिगीश्वरायैष वलिर्नमश्च॥ २७॥
गुर्वाद्या स्तारादिका यागमन्त्रा
लोकेशान्ता स्ते चतुर्थीनमोऽन्ताः।
स्युः पूजाया मग्निकार्ये द्विठान्ता
वीजैः पूजा स्याद्विभक्त्यादियुक्तैः॥ २८॥
असौ वलिविधि र्म तः सकलविघ्नवर्गापहः
समस्तपुरुषार्थदः सकलभीति-विद्रावणः।
स-तार-करण-ग्रहामरगणादि-सन्तोषकृ
द्गवाश्व-गजवर्द्धनः सुतसुखायुरारोग्यकृत्॥ २९॥

---

(४) प्रयोगस्तु ओं रविग्रहयोनिभ्यः सिंहदेवताभ्यएष वलिर्नम इत्यादि।

ततो धौत दन्तास्यहस्ताङ्घ्रियुग्मं
स शिष्यं गुरुः पाययन् पञ्चगव्यं ।
स्वकुण्डान्तिकं चानये द्दिव्य-दृष्ट्या-
विलोक्या स्मचैतन्य मारोप्य तस्मिन् ॥ ३० ॥

वदे दध्वषट्कं शिशो शोधयेयं (१)
ततोऽमुं निवेश्याग्रत स्वाध्वषट्कं ।
क्रमात् शोधये द्दोधनं तत्वशुद्धि
स्ततः शोधनं वोधनं प्राहुरत्र ॥ ३१ ॥

कलाध्वा (२) तत्वाध्वा तदनु भुवनाध्वा मनुपदा-
स्वराध्वान स्वेत्यं षड़िह कथिता स्तानथ शृणु ।
निवृत्त्याद्याः पञ्चप्रणवजनिता भौतिककलाः
कलाध्वा ऽथो (३) नाना भवति किल तत्वाध्व-विषयः (४) ॥ ३२ ॥

द्वात्रिंशत्शैवतत्वं (५) दशन-मित मथो वैष्णवं चाथ मैत्रं
चातुर्विंशं दश प्राकृतिक मथ शिशो सप्तकं त्रैपदं (६) स्यात् ।
शैवान्यत्र त्रिधास्यः (७) क्रमत इह पुनः पञ्चशुद्धानि सप्त-
शुद्धाशुद्धान्यशुद्धान्यपि तदनु चतुर्विंशतिस्तन्निवोध ॥ ३३ ॥

---

(१) हे शिशो ! तव अध्वषट्कं शोधयेयं इतिवदेत् ।

(२) कलाध्वा तत्वाध्वा भुवनाध्वा मन्त्राध्वा पदाध्वा वर्णाध्वावेति षडध्वानः ।

(३) प्रणवांशजनिता निवृत्त्याद्याः पञ्चभूतानां पञ्चकलाः कलाध्वा ।

(४) विषयः प्रपञ्चः ।

(५) अत्र षट्त्रिंशदिति पाठोयुक्तइव प्रतिभाति ।

(६) त्रिपदात्मकं ।

(७) शुद्धानि शुद्धाशुद्धानि अशुद्धानि चेति त्रिधाभवन्ति ।

शिवश्च शक्तिश्च सदाशिवेशौ विद्येति शुद्धान्यथ काल माये ।
देवंकला चाथ पुमानविद्या राग स्तथैतान्युभयात्मकानि (१) ॥ ३४ ॥
तन्मात्रपञ्चक (२) मथो दश चेन्द्रियाणि
भूतानि पञ्च च मन: प्रकृतिश्च बुद्धि: ।
साहंकृति स्तत इमानि वदन्त्यशुद्धा--
न्येवं त्रिधा निगदित: शिवतत्त्ववर्ग: ॥ ३५ ॥
तन्मात्रा: पञ्चभूतान्यपि च दश पुनर्ज्ञानकर्म्मेन्द्रियाणि
प्राणाधीश श्च जीव: स्वहृदय-कमलं चित्तमर्कादिकानां (३) ।
तेजांसि त्रीणि नारायण-सहितचतुर्व्यूह देवै श्चतुर्भि-
र्द्वात्रिंशद्वासुदेवादिभिरिति मनसा विद्धि तत्त्वानि विष्णो: ॥ ३६ ॥
भूतानि मात्राश्च दशेन्द्रियाणि
मनोऽभिमान: (४) प्रकृतिश्च बुद्धि: ।
एवं चतुर्विंशति-संख्यकानि
मैत्राणि (५) तत्त्वानि निवोध वत्स ॥ ३७ ॥
निवृत्त्यादिकास्ता: कला: पञ्च विन्दु:
कला नादशक्ती सदाख्य: शिवश्च (६) ।
दश प्राकृतान्येव तत्त्वानि चैता
न्यथो त्रैपदं तत्त्ववर्गं निवोध ॥ ३८ ॥

---

(१) शुद्धाशुद्धानि । (२) शब्दस्पर्शरूपरसगन्धा: ।
(३) सूर्य्येन्दुवह्नीनां । (४) अभिमानोऽहङ्कार: ।
(५) मित्रदैवतानि । (६) सदाशिवश्च ।

आत्मा विद्या शिव:पश्चाज्जीवोऽविद्या स्वयं पुन: ।
सर्वतत्वंच तत्वानि समैव त्रिपदात्मन: ॥ ३८ ॥
तत्वाध्वाय मुदीरत: पुन रिह ब्रह्माण्डभाण्डोदरे
भूलोकादिक सप्तसप्त भुवनान्येषा मधोऽध:पुन: ।
संभूयैव चतुर्द्दशेति भुवनाध्वा कीर्त्तित: सूरिभि
र्मंत्राध्वाऽखिलमन्त्रराशि रुदित स्ते तान्त्रिका वैदिका: ॥ ४० ॥
शुद्धैर्वर्णकदम्बकै (१) र्मुनिमतैकार्थान्वितै: (२) स्यु:पदा
न्येभिश्चान्तविभक्तिकै: पुनरिह ज्ञेय: पदाध्वा बुधै: ।
वर्णाध्वा स्वरविन्दुसर्गहलयुक् पञ्चाशवर्णात्मक:
प्राप्नोत्येभि रकिञ्चनोऽपि परमं षड्भि: पदं ह्यध्वभि: ॥ ४१ ॥
विशोध्याध्वषट्कं शिशोरित्यमंघ्री (३)
शिवेनाभिहृद्भालमूर्द्धस्वथैतान् ।
न्यसेत् शिष्य मेनं स्पृशन् कूर्च्च-मूर्द्ना (४)
स्वकुण्डे गुरु: स्थण्डिले वा तिलाज्यै: ॥ ४२ ॥
अमुकस्य शिशो रितिक्रमेणा मुक मध्वान महं विशोधयामि ।
हुतभुक्प्रियया सहेद मुक्ता (५) जुहुया दष्टश एककं हुताशे ॥४३॥

(१) वैखर्य्यांनिष्पादितै: ।

(२) पाणिण्यादिमतोयएकार्थ स्तदन्वितै: सङ्केतितार्थयुक्तैरित्यर्थ: ।

(३) पादयो:, कलाध्वनेनम: इत्यादिना ।

(४) कुशकूर्च्चाग्रेण स्पृशन् न्यसेत् ।

(५) अमुकशिष्यस्य कलाध्वानमहं शोधयामिस्वाहा इत्यादि क्रमेण ।

परमात्मनि तान् प्रलाप्य भूत्यै जनयित्वा पुनरुद्भव क्रमेण ।
शिशुवर्ष्मणि दिव्यदृष्टिपातैः पुनरुद्वासयतु स्व मात्मधाम ॥ ४४ ॥

नेत्रे तस्य शिशोर्निबध्य शुचिना वस्त्रेण नेत्राणुना
धृत्वा तं करयोः स्वकुण्डतटत स्तन्मण्डलान्तं नयेत् ।
संपूज्याथ तदञ्जलिं सुकुसुमैः (१) कुम्भोपरि क्षेपयेत्
प्रीत्यै तन्निजदैवतस्य तदथो दृग्बन्धनं मोचयेत् ॥ ४५ ॥

निवेश्य कुशसंस्तरे त मथ तत्र पूर्व्वाध्वनाऽऽ
स्वयागविधिना (२) मनोमुनिकराङ्गमन्त्रादिकान् ।
न्यसेद्वपुषि तस्य तां कलशगां निजां देवतां
यथावदमुना ऽर्च्चये (३) न्मलयजादिभिः पञ्चभिः ॥ ४६ ॥

अनुज्ञाप्य देवं परिस्पृश्य शिष्यं
करे तं गृहीत्वा नयेत् स्नानवेदीं ।
पुनर्ब्राह्मणै मंङ्गलस्तोत्रवाग्भिः (४)
सकुम्भं गुरु श्चानये त्तत्समीपं (५) ॥ ४७ ॥

अथाभिषेकमण्डपे सुखोपविष्ट मासने (६) ।
गुरु र्विशोधयेदमुं पुरेव शोषणादिभिः ॥ ४८ ॥

अथ पटुरवमुख्यवाद्य-घोषै र्द्विजमुखनिष्पतदाशिषांरवेण ।
सुनियत मपि सुस्थितं स्वशिष्यं कलशजलै रभिसेचयेत् यथावत् (७)॥४९

(१) स्वकुसुमैरिति (ग) पुस्तके पाठः । (२) अन्तर्यागविधानेन ।
(३) शिष्येण गन्धादिभिरुपचारपञ्चकै र्यथाविधि पूजयेदित्यर्थः ।
(४) मङ्गलस्तोत्ररूपा वाचो येषां तै रित्यर्थः ।
(५) शिष्यनिकटं । (६) भद्रासने । (७) वक्ष्यमाण विधिना ।

विलोमानुलोमोदिता मातृकार्णान् (१)
पठन्मूलमन्त्रं सहस्राक्षमन्त्रान् (२) ।
क्रमादृर्भगुच्छोद्गतैः कुम्भतोयैः
शिरस्तः पदाग्रावधि प्लावयित्वा ॥ ५० ॥

तेना भिलीनमणिमन्त्रमहौषधेन (३)
धाम्ना परेण परमामृतरूपभाजा ।
संपूरयन् (४) वपु रमुष्य शिशो र्जलेन
तत्कल्पवल्लिमयपल्लववृन्द (५) मास्यात् ॥ ५१ ॥

आनीय तत्कलशतः शिरसि प्रवेश्य (६)
विन्यस्य शिष्य मथ शेषजलै स्तदीयैः ।
संस्नाप्य चास्त्रमनुपूजितवर्द्धनीस्थै
रक्षार्थ मस्य पुन रम्बुभि रेष सिञ्चेत् ॥ ५२ ॥

आचामयित्वा पुनरेव शिष्यं तत्शेषतोयैः सकलीविधाय (७) ।
निर्मृष्टसर्वावयवं (८) तमिदं निवेदये नूतन-वस्त्रयुग्मं ॥ ५३ ॥

---

(१) विलोमतोऽनुलोमतश्चपठितान् अकारादिक्षकारान्तान् क्षकारादि अकारान्तांश्च मातृकावर्णान् ।

(२) ओं सहस्राक्षं शतधारं इत्यादिकांश्च ।

(३) अभिलीनानि मणिमन्त्रमहौषधानि यत्र तेन जलेनेत्यर्थः ।

(४) देहं व्यापयन् ।

(५) कल्पवृक्षरूपत्वेन न्यस्तंतत्पल्लव वृन्दं ।
आस्यात्मुखात् आनीयेत्यग्रिमान्वयि ॥

(६) प्रणवेण तत्शिरसिन्यस्येत्यर्थः ।

(७) देहेषडङ्गानिन्यस्त्वा । (८) प्रोञ्छिताङ्गं ।

प्रोक्तेनैवं कलशविधिनैकेन वानेककुम्भै

र्भक्त्या योवा सुमति रभिषिञ्चे न्नरो मन्त्रजापी ।

कामान् प्राप्नोत्ययमिह परत्रापि किञ्चि न्न चित्रं

लोके श्चिन्त्यो न खलु मणिमन्त्रौषधीनां प्रभाव: ॥ ५४ ॥

ग्राम्योदकं गाङ्गजलेऽनुषक्तं गङ्गा यथास्या न्मनुजोऽपि तद्वत् ।

भवेद्वपुर्मातृमलं (१) विधूय मन्त्राम्बुषेका दिह दिव्यदेह: ॥ ५५ ॥

शिष्योऽथ वस्त्रयुगलं परिधाय शुद्धं

गोरचनातिलकचर्च्चितभालदेश: ।

स्रग्गन्धभूषणसुभूषितकाययष्टि

राचम्य सम्यगुपशान्तमना स्त मार्य्यं ॥ ५६ ॥

पादोपसंग्रहणपूर्व्वक माशु नत्वा

मा त्राह्य वोधतमसोऽमलवोधदीपै: (२) ।

विज्ञाप्य दीनवचसेत्य मुपास्य पादौ

वेद्या मदृष्टचरणोऽथ विशेत्तोदग्रे (३) ॥ ५७ ॥

तं प्राङ्मुखं विहित वाग्यमनं पुरस्तात्

प्रत्यङ्मुखो गुरुरसौ परिमृश्य मूर्द्ध्नि ।

न्यस्येन्मनोर्मुनिकराङ्गपदाक्षरादि-

न्यासां स्तथाऽस्य वपुषि प्रतिवाच्य वाचा (४) ॥ ५८ ॥

---

(१) वपुषिस्थितं मातृरजोमलं त्यत्क्वेत्यर्थ: ।

(२) अमलज्ञानप्रदीपैरज्ञानान्धकारात् मां त्राहीति विज्ञाप्येत्यन्वय: ।

(३) पश्चाद्गृहीतपादाग्र: गरुड़ासनस्थइति यावत् ।

(४) मुन्यादिन्यासं कराङ्गन्यासं पदन्यासं प्रत्यक्षरन्यासं च तन्मुखेनोच्चारयित्वा न्यसेदित्यर्थ: ।

विलिख्य मन्त्राक्षरपंक्तिमादौ
पत्रे क्वचि (१) चन्दनमिश्रतोयैः ।
संताड़येद् यंसहितामुकार्णं
यंताड़यामीत्यपि (२) ताड़नं स्यात् ॥ १८ ॥
आलिख्य मन्त्रं करवीरपुष्पै
र्मन्त्रार्णसंख्यै रमृतार्णं (३) मुक्त्वा ।
प्रबोधयामीति तथा निहन्यात्
प्रत्यक्षरं बोधनमेतदाहुः ॥ २० ॥
तथाविलिखितं मनो र्लिपिगणं च तत्संस्थकै
र्द्दृढ़ै रश्वलदलच्छटै रुपहृतेन सत्पाथसा (४) ।
मनो रमुकमक्षरं स्वमनुनाऽभिषिञ्चाम्यहं
ध्रुवं स्तदभिषेचयेदिति मतोऽभिषेको मनोः ॥ २१ ॥
तारं व्योमहुताशविन्दुमनुयुग्ज्योतिर्मनुः (५) कीर्त्तित
स्तेन स्वे हृदि चिन्तितस्य च मनो स्त्रेधा मलं निर्द्दहेत् (६) ।
स्यादेषा विमलीकृति र्मनुमलं स्यादाणवं कार्म्मणं
तद्वन्मायिकमित्यमीभि रमितो मन्त्रो मले र्म्लायते ॥ २२ ॥

(१) क्वचित् पूर्व्वोक्तान्यतमरूपे ।
(२) यं पुटितमसुमक्षरं ताड़यामीत्यर्थः ।　　(३) वं वीजं ।
(४) अश्वथ्यपत्रै र्द्दृढ़ैरानीतेन शुद्धोदकेनेत्यर्थः ।
(५) ह्रौं इति ज्योतिर्मन्त्रः ।
(६) ज्योतिर्मन्त्रेण अमुकमन्त्रस्यामुकमलं दहामीतिप्रयोगः ।

गुरो र्विष्णुगेहे स्वयं भिक्षितान्नं (१)
यवक्षोदसक्तूं स्तथाश्वत्थमूले ।
सुदुग्धोदकं सिन्धुतीरे जपं स्वे-
ष्वच स्थानभक्ष्यं व्यतीतं (२) विदध्यात् ॥ ३ ॥
अन्यत्र नास्ति नियमः किमपीह भक्ष्यं
शुद्धं हविष्य मुपयुज्य निशां नयेत ।
ब्राह्मे दिने मृदुनि किंशुकदक्षिणस्थे (३)
ऽमत्रेऽशनं लघु मतं कलधौतके (४) वा ॥ ४ ॥
खिन्नं (५) पर्य्युषितं (६) च तैलमधुसक्षारं करञ्जं तथा
निम्बं विम्बमसूरकोद्रवभवं मांसं विषं मूलकं ।
ताम्बूलं लशुनं दिवाशन मपि स्नेहेनशून्यं दिवा-
स्वप्नं द्यूतविहारगीतकुतुकारम्भं त्यजे ज्जापकः ॥ ५ ॥
आरनालकरले (७) च गुञ्जनं कांस्यपात्रमधुमांसभोजनं ।
मन्त्रवीर्य्यहरमीरितं वुधैःसर्व्वथाऽनृत मुदीरितं तथा ॥ ६ ॥

---

(१) गुरुगृहे देवालये च जपन् स्वकृत भिक्षया लब्धमन्नं भुञ्जीत इत्यर्थः ।

(२) यत्रस्थाने यद्भक्ष्य मुक्तं तद्व्यत्ययं न कुर्य्यादित्यर्थः ।

(३) पत्रद्वयवतः पलाशस्य दक्षभागीयं पत्रं ब्राह्ममुच्यते तादृशेऽमत्रे पात्रे दिवा भुञ्जीत इत्याशयः ।

(४) कलधौतं रूप्यहेम्नोः ।

(५) अस्वपक्क धान्य जन्य तण्डुल प्रभवं ।

(६) यातरात्रमन्नं ।

(७) आरनाल पदं काञ्जिकापरं करलपदं तु ( कलरा ) इतिख्यातद्रव्य-परं पटोलपरमिति केचित् ।

एवं सिद्धमनो मनोऽभिलषिताः स्युः सिद्धयः सर्वत-
स्ता एवोत्तममध्यमाधमतया नृणां भवन्ति त्रिधा।
तेषा मुत्तमसिद्धिमा न कमपि व्यापार मालम्बते
तत्त्वं (१) मध्यमसिद्धिमानभिलषत्यऽन्यस्तु कामान् बहून् ॥ ५१ ॥
अयत्नतो वाञ्छितसिद्धि रञ्जसा
सुखं सुराणां सविलासदर्शनम्।
षड़ूर्म्यभावं (२) परमृत्युवञ्चनं
मतं नृणा मुत्तमसिद्धिलक्षणं ॥ ५२ ॥
परकायपुरप्रवेशनं (३) प्रसभं खेचरलोकमेलनम्।
अवनं दिविषद्गिरां क्षितौ कथितं मध्यमसिद्धिलक्षणम् ॥ ५३ ॥
क्षितिवाहनभूषणादिलाभो
नृपलोकप्रियता च वाक्यसिद्धिः।
कविता सुतसंपदाद्यभावो
दृढ़ताऽङ्गे (४) ऽधमसिद्धिचिह्न मेतत् ॥ ५४ ॥
निष्कामः किमपि न कांक्षते मनीषी
संग्रामोपशमतया (५) स मुक्ति मेति।
काम्यानि स्पृहयति दुर्लभानि कामी
तत्सिद्ध्यै कतिचन दर्शयाम्युपायान् ॥ ५५ ॥

---

(१) तत्त्वज्ञानं, उत्तमसिद्धि मत्वा।
(२) क्षुधादीना मभावं।
(३) परकाये परपुरे च प्रवेशनं।
(४) अङ्गे अशिथिलता।
(५) रागद्वेषादिद्वन्द्वोपशमः।

शान्ति: कृत्यामयार्त्तिग्रहभयशमनं यस्तु तत् कर्त्तुकामो
हेमन्ते पञ्चमेऽंशे सलिलसमुदये शस्तदोशानवक्त्र: ।
गोत्वक् शुक्लाम्बरस्योपरि शुचिमनसा बद्धपद्मासनस्थ:
कुम्भे चावाह्य देवीं रति मथ स जपन् दर्शयेत् पद्ममुद्रां ॥ ७८ ॥
यन्त्रे चाम्भोरुहस्थे (१) मलयजलिखिते देव मावाह्य शुक्लं
साध्यार्णा मन्त्रवर्णान्तरविवरगता अस्य सम्यक् प्रपूज्य ।
मन्त्रं जप्त्वा ठवीजान्वित मुदितपया होम मापाद्य वृत्ते
कुण्डे कल्पोक्तहव्यै र्हितगुरुवचसा साधयेत् शान्तिकर्म्म ॥ ७९ ॥
वश्यं मज्जनताविधेयकरणं तत् कर्त्तुमिच्छु र्मधौ
ह्यासोदय उत्तराननतया लाक्षियखड्गत्वचि (२) ।
स्थित्वा स्वस्तिक आसने प्रथमतो वाणीं प्रपूज्या ऽग्रतो
मुद्रां प्राणमयीं प्रदर्श्य लिखिते गोरचनाया द्रवै: ॥ ८० ॥
यन्त्रे वह्निगृहान्विते (३) ऽरुणरुचिं देवं विचिन्त्यार्चये-
त्स्तवा मन्त्रलिपिद्वयान्तरगतान् साध्याचरा नेककं ।
मंत्रं चामृतवीजपूर्व (४) ममक्ष ज्जप्त्वा तदन्ते हुतं
कुण्डे पद्मनिभे विधाय विधिव द्वश्यक्रियां साधयेत् ॥ ८१ ॥

---

(१) अर्द्ध चन्द्राकार पद्माङ्कित मण्डलमध्यस्थे यन्त्रे तद्दैवत यन्त्रे ।

(२) मार्जारकां यक्षाहते गण्डकचर्म्मणि ।

(३) त्रिकोणान्विते ।

(४) वं वीजपूर्वकं ।

नक्तं सुप्तस्य मर्त्त्यस्य मृतप्रायस्य नित्यशः ।
लालामिश्रमुखं प्रातः शोधनीयं हि तद्यथा ॥ ८३ ॥
करञ्जखरमञ्जरीवटकदम्बनिम्बाम्लिका
मखाङ्गरविकिंशरैकतमदारुणा चारुणा ।
कषायकटुकण्टकान्वितमदुग्धतिक्तद्रुमो-
द्भवेन मृदुलार्ज्जुना सुरभिणा प्रशस्तेन च ॥ ८४ ॥
कनिष्ठाङ्गुल्यग्रप्रमितपृथुना पर्व्वयुजा-
गृहीतेनोमायुर्ब्बलमिति (१) वितस्त्यायतिमता ।
अनाद्याये त्यक्त्वा मनु मथ शनै र्दन्तनिकरं
यथा रक्तस्रावो (२) न भवति तथा शोधयतु सः ॥ ८५ ॥
नहि प्रतिपदष्टमीनवमवासरैकादशी-
गिरीशतिथिपूर्णिमाग्रहणदर्शषष्ठीषु च ।
स्वजन्मतिथिसंक्रमव्रतविवाहपित्राह्निको-
पवासमुखदूषिते दशन (३)-मेधसा शोधयेत् ॥ ८६ ॥
अतो निषिद्धेषु दिनेषु निर्म्मलैः
समुद्धृतै र्व्वारिभि रफेनकर्द्दमैः ।
विधाय गण्डूष मथार्कसंख्यया (४)
विशोधये द्वा मुख माम्रपल्लवैः ॥ ८७ ॥

---

(१) ओँ आयुर्ब्बलमितिमन्त्रेण ।

(२) रक्तस्रावे तद्दिनमशौचमापतेदिति दैवपित्र्यकर्म्मानधिकारप्रसङ्गः स्यादित्याशयः । (३) काष्ठेन ।

(४) तेषु द्वादशगण्डूषैर्मुखशुद्धिर्विधीयतेइति वचनात् द्वादश संख्यया द्रष्टव्यः)

ब्राह्मी हंसाधिरूढा मुनिमनुजसुरै रर्चितर्ग्वेदयुक्ता
गायत्रीतिप्रसिद्धा मणिमुकुटलसद्देववक्त्रा त्रिनेत्रा ॥ ४१ ॥
साध्याह्नी यौवनस्था विशदमलयजस्रग्विभूषांशुकाढ्या
स्वर्ताब्जस्था चतुर्भि र्वदनसरसिजैः सत्रिनेत्रै र्विभान्ती ।
सावित्र्याख्या सचक्राम्बुजजलजगदा वैष्णवी वैनतेया-
रूढा गूढा समस्तश्रुतिपथपथिकैः संप्रयुक्ता यजुर्भिः ॥ ४२ ॥
सायंसन्ध्या च वृद्धा सिततरवसनस्रग्विलेपाङ्गभूषा
कृष्णाम्भोजान्तरस्था सशशिकलचतुर्वक्त्रपद्मा त्रिनेत्रा ।
शूलाक्षस्रक्कपालं डमरु मपि करैः सन्दधाना सरस्व-
त्याख्यातोक्षाधिरूढा सुरनरविनुता शाम्भवी सामयुक्ता ॥ ४३ ॥
ध्यात्वेत्थं कुसुमाक्षतैः स सलिले सत्ताम्रपात्रेऽथवा
यन्त्रे ता मनुचिन्त्य वेदजननीं तेजोऽभिमन्त्रादनु ।
आयाहीत्यभिवाह्य तत्र मनसा संपूज्य मन्त्रं जपे-
दासूर्य्योदय मूर्द्ध्वतिर्य्यगवनन्त्रास्येन दोष्णा क्रमात् ॥ ४४ ॥
जपान्ते पुनस्तां विचिन्त्यार्पयित्वा
जपं प्राणरोधं त्रिशः संविधाय ।
पुन र्याहिदेवीति तां सूर्य्यबिम्बे
समुद्वास्य तं सूर्य्य मर्च्चे-ज्जलान्तः ॥ ४५ ॥
ओँ हंसः शुचिसद्वचः पदैस्त्रिषड्भि
स्तोयान्त र्जलरुहकर्णिकां दलानां ।
सन्ध्याग्राण्यथ परितोऽनुकल्प्य वृत्तं
तत्रार्घं दिवसकृते नमे-न्निवेद्य ॥ ४६ ॥

नमः सवित्रे जगदेकचक्षुषे

जगत्प्रसूतिस्थितिनाशहेतवे।

त्रयीमयाय त्रिगुणात्मधारिणे

विरिञ्चिनारायणशङ्करात्मने॥ ४७॥

अथ तान्त्रिक एष तान्त्रिकी

मिह सन्ध्यां विधिना समाचरेत्।

विफला हि भवन्ति यां विना

खिलमन्त्रा बहुशोऽपि सेविताः॥ ४८॥

आचम्यावाह्य तोये निजमनुजपतः स्तीर्थवृन्दं ततश्च

क्षिप्ता दर्भे स्त्रिवारं भुवि पुन रमुना सप्तशो मूर्द्ध्नि सिञ्चेत्।

वामेनादाय किञ्चि त्तदपि च मनुना दक्षिणे मन्त्रयित्वा

भूयो वामे गृहीत्वा निजशिरसि कुशैः स्तेन सिञ्चे-च्चिकृत्वः॥ ४९॥

ततोऽञ्जल्यानीतं गुरुभि रुपदिष्टेन विधिना

शनैर्नाड्याऽऽकृष्याऽग्निमय मुदरं नीर मिडया।

स तेनान्तर्दोषं सपदि परिमृज्यान्यशिरया

विनिष्कृष्यामव्यस्तकुलिशरूपोपलतले (१)॥ ५०॥

ततः क्षिपे दूद्ध्वं सवञ्जलित्रयं कृत्वा मरुत्संयम मङ्गजेन (२) च।

सकृत्सरस्वत्स्वरसंख्यकेन त द्विधानतो रेचकपूर्व्वकं क्रमात्॥ ५१॥

---

(१) विनिक्षिपन्नस्त्रजपेन चात्मसं विधाय कृत्वेत्यघमर्षणं सुधीः।
वाह्यान्तराघौघनिकृन्तनं परं विशुद्धनामेति जपादिकर्म्मसु॥
इत्यधिकं (ग) पुस्तके।

(२) संगवेन च इति (ख) पुस्तके पाठः।

तण्डुलार्द्धमितमुद्गमिश्रितं पाचितं सुपयसाऽथ गालितं।
अर्द्धगोघृत परिप्लुतं भवेत् खेचरान्न मधिवासितं तथा॥ २६॥

क्षीरं तद्दशमांशतण्डुलयुतं पक्वा घृताक्ते दृढ़े
पात्रे क्लेददशावधि प्रतिलवं दर्व्या विलोड्याऽसकृत्।
पादं गव्यघृतंशितां च विषदां क्षिप्वा मरीचेन्दुजैः
क्षोदैश्चाप्यधिवासखण्डपिहितं तत्कल्पयेत् पायसं॥ २७॥

पयस्तण्डुलक्षोदनीराज्यतुल्यं
पचेन्मन्दवह्न्यार्च्चिषा मन्दमन्दं।
समालोड्य दर्व्या शिताक्षोदपाते
यवागूं तथा साधयेत् सौरभाढ्यां॥ २८॥

यवशालितण्डुलरजः कुड़वं परिपाकसिद्धपयसीनगुणे।
परिकीर्य्य खण्डहविषा प्रपचे-दधिवास्य यावक मिदं कल्पयेत्॥ २८॥

शुद्धैः कन्दै र्वीजमूलैः फलैश्च त्वग्भिः शून्यैः केवलै र्मिश्रितैर्वा।
पक्वा नीरैर्हिङ्गुजीराज्यलोणैः सौगन्धाढ्यं साधयेद्व्यञ्जनानि॥ ३०॥

माधुर्य्याणि कटूनि कानिचिदथो अम्लानि पाकैः पृथक्
व्यामिश्राणि रमान्तरेण मथनक्लिन्नानि भृष्टानि च।
नानाकारनिकृत्तवस्तुशकलैः संसाधितानि क्रमात्
पात्रेषु प्रतिपूर्य्य गोघृतप्लुतं प्रत्येकतः स्थापयेत्॥ ३१॥

मुद्गमाषचणकै र्हरिमन्थैः षड्गुणाम्बुनि खरानलसिद्धैः *।
रामठाज्यलवणार्द्रकजीरैः सूप मन्न मधिवास्य विदध्यात्॥ ३२॥

---

* तीव्राग्निपाचितैः।

